# संस्कृतदूतकाव्ययेषु मेघदूतस्य प्रभावः

**सुजीत कुमार**

संस्कृतसाहित्यारम्भः कालिदासस्य मेघदूतात् भवति। तदारम्भ्यः अद्यावधिः कथा–छन्द–रस–गुण–रीति–अलप्रारादीनां मेघदूतमिवानुकरणं भवति अन्येष्वपि दूतग्रन्थेषु। न केवलं भारतसाहित्येऽपितु अन्ताराष्ट्रियसाहित्येषु मेघदूतस्य प्रभावाः प्रकटिताः भवन्ति। पश्चाद्वर्ति दूतकाव्येषु प्रायशः मन्दाक्रान्ता छन्दसो विधानं भवति। विप्रलम्भश्रृंगारस्य विधानं सर्वाधिकं दूतकाव्येषु भवति। उपमारूपकानुप्रासादयः अलप्रारा प्रयुज्यते। तथा च वैदर्भीरीतिः प्रायः प्रयुज्यते। कथायां नायकनायिकायोर्मध्ये सामान्यतः विच्छेदनकारणात् शोकः उत्पन्नो भवति।यस्मात् कारणात् नायकनायिकाभ्यां सन्देशोऽपरं प्रति प्रेष्यते। अनुकरणग्रन्थेषु विंशतिशताब्द्यां परमेश्वरझाद्वारा लिखितं 'यक्षसमागम' काव्यं मेघदूतस्य पूरककाव्यमस्ति। यस्मिन् यक्षः शेषान् चतुरो मासान् यापयित्वा यक्षिणीं प्राप्नोति तथा च स्वप्रेयसीं प्रति प्रणयं निवेदयति। यस्मिन्काव्ये यक्षस्य सम्पूर्णप्रणयकथा वार्णितास्ति। विंशतिशताब्द्यामेव मन्दिकलरामशास्त्रीं मेघप्रतिसन्देशं लिखति। यस्मिन् मेघो यक्षिणीं यक्षस्य सन्देशान् निवेदयति तदनन्तरं यक्षिणी स्वसन्देशेन सह मेघं यक्षस्य समीपं पुनः प्रेषयति।